योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः २०४

चतुरधिकद्विशततमः सर्गः २०४

श्रीवसिष्ठ उवाच ।

भूय एव महाबाहो श्रृणु मे परमं वचः ।

आदर्शो राजतेऽत्यर्थं पौनःपुन्येन मार्जितः ।। १

अर्थो वेदनसंकेतः शब्दो जलरवोपमः ।

दृश्यमेतच्चिदाभानं स्वप्नवत्क्वाभवज्जगत् ।। २

जाग्रद्वै स्वप्नसंदृष्टः स्मरणात्म स्थितं पुरः ।

संविद्वेदनमात्रं सत्तदन्याकारवत्ततम् ।। ३

यथाच्छं संविदाकाशं मयि स्वप्नपुरात्मकम् ।

सरूपमपि नीरूपं तथेदं भुवनत्रयम् ।। ४

श्रीराम उवाच ।

संपन्नेयं कथं भूमिः संपन्ना गिरयः कथम् ।

कथं संपन्नमम्भश्च संपन्ना उपलाः कथम् ।। ५

कथं च तेजः संपन्नं संपन्ना च कथं क्रिया ।

कथं च कालः संपन्नः संपन्नः पवनः कथम् ।। ६

कथं च शून्यं संपन्नं संपन्नं चिन्नभः कथम् ।

इति ज्ञातं मया भूयो बोधाय वद मे प्रभो ।। ७

श्रीवसिष्ठ उवाच ।

ब्रूहि राघव तत्त्वेन स्वप्नदृष्टमहापुरे ।

संपन्ना भूः कथमिव संपन्नं कथमम्बरम् ।। ८

कथं वारि च संपन्नं संपन्ना उपलाः कथम् ।

कथं च तेजः संपन्नं संपन्नाश्च कथं दिशः ।। ९

संपन्नश्च कथं कालः संपन्ना च कथं क्रिया ।

कथमेतन्निमित्तादि सर्वं संपन्नमुच्यताम् ।। १०

केनेदं निर्मितं दग्धमानीतं रचितं चितम् ।

उत्पादितं प्रकटितं किमाचारं किमात्मकम् ।। ११

श्रीराम उवाच ।

आत्मास्य केवलं व्योम न सद्भूम्यचलादिकम् ।

जगतः स्वप्नरूपस्य निराकारो निरास्पदः ।। १२

आत्मैव व्योमरूपोऽस्य निराधारो निराकृतिः ।

विनाकृतेर्वा व्योम्नोऽस्य किमाधारेण कारणम् ।। १३

न किंचिदेतत्संपन्नं सद्यथैतन्न संविदः ।

एतच्चित्कचनं नाम मन एव तथा स्थितम् ।। १४

दिक्कालाद्यत्र चिद्भानं चिद्भानमचलादिकम् ।

चिज्जलादि तथा बोधाच्चित्खं वाय्वादि तद्विदः ।। १५

संविदेव किल व्योम तिष्ठति व्योमतामिता ।

दृषत्तयास्ते काठिन्याद्द्रवाज्जलमिव स्थिता ।। १५

वस्तुतस्तु न भूम्यादि किंचित्तन्न च दृश्यता ।

चिदाकाशमनन्तं तत्सर्वमेकं तदात्मकम् ।। १७

द्रवत्वादम्बु हृद्याब्धेर्नानावृत्तितया यथा ।

अनानैव भवेन्नाना चिद्व्योमात्मनि वै तथा ।। १८

काठिन्यवेदनादुर्वी गिरितामागतेव चित् ।

शून्यतावेदनाच्छून्यं वेत्ति व्योमेव चिद्वपुः ।। १९

द्रवत्ववेदनाद्वेत्ति वारि स्पन्दतयानिलम् ।

औष्ण्यसंवित्ततो वह्निमत्यजन्ती निजं वपुः ।। २०

एवंस्वभाव एवायं चिद्धातुर्गगनात्मकः ।

यदेवं नाम कचति निष्कारणगुणक्रमम् ।। २१

न चैतद्व्यतिरेकेण किंचिन्नापीह विद्यते ।

अन्यच्छून्यत्ववारिभ्यामृते खार्णवयोरिव ।। २२

न तु चिद्गगनादन्यन्न संभवति किंचन ।

इदं त्वमहमित्यादि तस्मादाशान्तमास्यताम् ।। २३

त्वं यथास्मिन् गृहे कुर्वन्नग्निशैलादिकां विदम् ।

तदेव पश्यस्यवपुरेवं चिद्गगनं तथा ।। २४

चिद्व्योम भाति देहाभं सर्गादौ न तु देहकः ।

अकारणत्वादसतश्चिदुदेतीति चिन्त्यताम् ।। २५

मनोबुद्धिरहंकारो भूतानि गिरयो दिशः ।

शिलाजठरवन्मौनमयं सर्वे यथास्थितम् ।। २६

एवं न किंचिदुत्पन्नं नष्टं न च न किंचन ।

यथास्थितं जगद्रूपं चिद्ब्रह्मात्मनि तिष्ठति ।। २७

चितौ यत्कचनं नाम स्वरूपप्रविजृम्भणम् ।

तदेतज्जगदित्युक्तं द्रव एव यथा जलम् ।। २८

इदं जगद्भानमभानमेव

चिद्व्योम शून्यं परमार्थ एव ।

यथ'र्थसंदर्शनबुद्धबुद्धे-

रबुद्धबुद्धेस्तु यथा तथास्तु ।। २९

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० नि० उ० चिदाकाशैकताप्रतिपादनं नाम चतुरधिकद्विशततमः सर्गः ।। २०४ ।।